न शुद्धाः इति स वर्त्तमान इत्यर्थः । कला भभोगभक्ता गता योगास्तदग्रिमो वर्त्तमान इति तात्पर्य्यम् । तस्य शेषं गतं भोगात् पतितमेष्यं ताभ्यां घटिकाद्यानयनमाह । गता इति । गता एष्याः । चः समुच्चये । कलाः षष्टिगुणिताः कार्य्यास्ताभ्यो भुक्तियोगाप्तनाडिका रविचन्द्रकलात्मकगत्योर्योगेन भजनाल्लब्धा घटिका गतैष्या भवन्ति । अत्रोपपत्तिः । सूर्य्यचन्द्रयोगमितस्य ग्रहस्य नक्षत्राणि विष्कम्भादिसञ्ज्ञानि योगोत्पन्नत्वाद्योगा अतस्तदानयनं पूर्वोक्तवत् । अतएव सूर्य्यचन्द्रगतियोगतुल्यतद्गत्या षष्टिसावनघटिकास्तदा गतैष्या कलाभिः का इत्यनुपातेन गतैष्यघटिकानयनं युक्तमुक्तम्” रङ्गना० । “अर्कोनचन्द्रलिप्ताभ्यस्तिथयो भोगभाजिताः । गता गम्याश्च षष्टिघ्ना नाड्यो भुक्त्यन्तरोद्धृताः” सू० सि० । “पूर्वार्द्धव्याख्यानं पूर्वश्लोकपूर्वार्द्धरीत्या ज्ञेयमुत्तरार्द्धं स्पष्टम् । अत्रोपपत्तिः । “तिथिभोगकलाभिरेका तिथिस्तदा सूर्य्योनचन्द्रकलाभिः का इत्यनुपातेन फलं गततिथयो वर्त्तमानतिथेर्गतैष्ये शेषशेषोनभोगकले ताभ्यां गत्यन्तरकलाभिरनुपातेन गतैष्यघटिकाः पूर्ववत्” रङ्गना० ।

कल्पे तिथिमानमुक्तं सि० शि० यथा

“विधिदिने दिनकृद्दिवसाः करेन्द्रियशरेषुभवोऽर्वुद संगुणाः । नवनवाङ्ककराभ्ररसेन्दवः प्रयुतसंगुणिता विधुवासराः” १६०२९९९०००००० । अत्रोपपत्तिः, रविवर्षाणि दिनीकृतानीति सुगमम् । चन्द्रार्कयोर्यावन्तः कल्पे योगास्तावन्तः किल शशिमासाः । ते तु योगा भगणान्तरतुल्याः स्युः । उभयोरपि प्रागगमनात् । अतो भगणान्तरतुल्याः शशिमासा भवन्ति । ते त्रिंशद्गुणाः शशिदिवसा भवन्तीत्युपपन्नम् ।

युगे तिथिसंख्या सू० सि० उक्ता यथा ।

युग इत्युपक्रमे चान्द्रदिनप्रमाणमाह

“चान्द्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः” सू० सि० । “अष्टाश्विगजसप्तभूगोलगसप्तपञ्चभूमिता युगे सूर्य्यसावनदिवनाः । चान्द्रा दिवसा युगतिथय इत्यर्थः । अशीतिशून्यचतुष्कत्रिखन्दपा एते त्रिंशद्भक्ताश्चान्द्रमासा उक्तप्रायाः । अनेनैव चान्द्रदिवसानामुपपत्तिः सूर्य्यचन्द्रयोर्भगणयोरन्तरकृपचान्द्रमासास्त्रिंशद्गुणिता इति स्पष्टीकृताः” रङ्गना० ।

तिथिभेदे देवभेदपूजा पीयू० धा० घृतवाक्ये नोक्ता यथा तत्र नारदः “यद्दिनं यस्य देवस्य तद्दिने तस्य संस्थितिः” अग्निपुराणेऽपि “प्रतिपद्यग्निपूजा स्यात् द्वितीयायाञ्च वेधसः । दशम्यामन्तकस्यापि षष्ठ्यां पूजा गुहस्य च । चतुर्थ्यां गणनाथस्य गौर्य्यास्तत्पूर्ववासरे । सरस्वत्या नवम्याञ्च । सप्तम्यां भास्करस्य च अष्टम्याञ्च चतुर्द्दश्यामेकादश्यां शिवस्य च । द्वादश्याञ्च त्रयोदश्यां हरेश्च मदनस्य च । शेषादीनां फणीशानां पञ्चम्यां पूजनं भवेत् । पर्वणीन्दोस्तिथिष्वासु पक्षद्वयगतास्वपीति” ।

पञ्चदशसंख्यायां सू० सि० उदा० ।

स्त्रीत्वे “वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना” कुमा० । पुंस्त्वे “निखिलान् निशि पूर्णिमा तिथीनुपतस्येऽतिथिरेकिका तिथिः” नैष० ।

**तिथिकृत्य** न० ७त० । तिथिविहिते कार्य्ये “तिथिकृत्ये च कृष्णादिर्न ते शुक्लादिरेव च । विवाहादौ स्मृतः सौरः शेषेषु सावनो मतः” मल० त० । तिथिविशेषे कृत्यानि च तिथितत्त्वे कालमाधवीयनिर्णयसिन्धुग्रन्थप्रभृतिनिबन्धेषु दृश्यानि ।

तिथिभेदेषु कृत्याकृत्यानि पी० धा० वशिष्ठोक्तानि यथा “नोद्वाहयात्रोपनयप्रतिष्ठासीमन्तचौलाखिलवास्तुकर्म्म । गृहप्रवेशाखिलमङ्गलाद्यं कार्य्यं हि मासाद्यतिथौ कदाचित्” । मासाद्यतिथौ शुक्लपक्षप्रतिपदि अतएव कृष्णपक्षप्रतिपद्येतानि कर्म्माणि सुखेन भवन्तीत्यर्थः । यद्येषोऽभिप्रायोऽसम्मतः स्यात्तदा पक्षाद्यतिथाविति ब्रूयात् । “सप्ताङ्गचिह्नानि नृपस्य वास्तुव्रतप्रतिष्ठाखिलमङ्गलानि । यात्राविवाहाखिलभूषणाद्यं कार्य्यं द्वितीयादिवसे सदैव । सङ्गीतविद्याखिलशिल्पकर्म्म सीमन्तचौलान्नगृहप्रवेशम् । कार्य्यं द्वितीयादिवसे यदुक्तं सदा तृतीयादिवसेऽपि कार्य्यम् । रिक्तासु विद्युद्वधबन्धशस्त्रविषाग्निघातादि च याति सिद्धिम् । यन्मङ्गलन्तासु कृतं विमूढैर्विनाशमायाति तदाशु नूनम्” । रिक्तासु चतुर्थीनवमीचतुर्द्दशीषु४।९।१४।“शुभानि कार्य्याणि चरस्थिराणि चोक्तान्यनुक्तान्यपि यानि तानि । सिद्धिं प्रयान्त्याशु नृपाप्रदानं विनाशदं नागतिथौ विधेयम् । अभ्यङ्गयात्रापितृकर्म्मदन्तकाष्ठं विना पौष्टिकमङ्गलानि । षष्ठ्यां विधेयानि रणोपयोग्यशिल्पानि वस्त्राम्बरभूषणानि । द्वितीयायां तृतीयायां पञ्चम्यां कथितान्यपि । तानि सिध्यन्ति कार्य्याणि सप्तम्यां निखिलान्यपि । संग्रामयोग्याखिलवास्तुशिल्पनृपप्रमोदाखिललेखनानि स्त्रीरत्न-